शास्त्री - II खण्ड साहित्यम्

रघुवंश महाकाव्यम्
चतुर्दशः सर्गः

classmate
Date ____
Page ____

प्र० (1) - तपस्विवेषक्रिययाऽपि तावद्यः प्रेक्षणीयः सुतरां बभूव ।
राजेन्द्रनेपथ्यविधानशोभा तस्योदिताऽऽसीत्पुनरुक्तदोषा ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति ।

अस्मिन श्लोके श्रीरामस्य सौन्दर्यस्य वर्णनं करो॰ यो हि रामः तपस्विवेषजटादिधारणेनापि सातिशयं दर्शनीय एवासीत, स एव पुनः राजवेषरचनया द्विगुणतरो मनोहरो बभू॰ स्वाभाविकशोभावती रामस्य राजमुकुटादिराजचिन्ह धारणं सिद्ध साधनमिवाभवदित्यर्थः ।

व्याख्याः - यः = रामः, तपस्विवेषक्रियया = तापसनेपथ्यरचनया अपि सुतरां = नितराम्, प्रेक्षणीयः = दर्शनीयः तावत एव । बभूव ... तस्य = श्रीरामस्य, राजेन्द्रनेपथ्यविधानशोभा = नृपवेषरचनाक॰ पुनरुक्तदोषा = द्विगुणा, आसीत् = अभूत, समवर्तत ।

Renu Devi
27/04/21
राधाउमाकान्त सं० महावि० सुरवसेना,
पूर्णिमा ।

उपशास्त्री - II खण्ड (साहित्य)

## श्रुतबोध

प्र० (1) - उपजातिच्छन्दस्य लक्षणम् उदाहरणञ्च लिखत ?

उत्तरम् → यत्र द्वयोरथ्यनयोस्तु पादा भवन्ति सद्वृत्ततयाऽतिकान्ते ।
विद्वद्भिराद्यैः परिकीर्तिता सा प्रयुज्यतामित्युपजातिरेषा ॥

व्याख्या - प्रस्तुतोऽयं छन्दः महाकवि कालिदास विरचितः श्रुतबोध छन्दशास्त्रस्य उद्धृतोऽस्ति ।
हे सद्वृत्ततया अतिकान्ते ! हे सद्व्यवहारतयाऽतिसुन्दर ! यत्र यस्मिन् छन्दसि अनयोः इन्द्रवज्रोपेन्द्रवज्रयोः द्वयोः उभयोः अपि पादाश्चयः (प्रथमतृतीयाविन्द्रवज्रायाः द्वितीयचतुर्थौ उपेन्द्रवज्रायाः) स्युस्तदा आद्यैः प्राचीनैः विद्वद्भिः पण्डितैः परिकीर्तिता प्रतिपादिता सा असौ एषा इयमुपजातिः तन्नामक वृत्तं प्रयुज्यतां कथ्यताम् ।
उदाहरणं यथा —

अत्रानुगोदं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥

Rinku Devi
27/04/21

राज्यावमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री-प्रतिष्ठा-I खण्ड (साहित्य)

शिशुपालवधम् - प्रथम सर्गः

प्र०-(1) पद्यमिदं व्याख्येयम् ?

महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे ।
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम् ॥

उत्तरम्- प्रसङ्गः- प्रस्तुतोऽयं श्लोकः महाकवि माघ विरचितः शिशुपालस्य महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीकृष्णस्य पुरः नारदस्य वर्णनम् आह -

व्याख्या:— महामहानीलशिलारुचः = बृहदिन्द्रनील मणिकान्तेः, सिंहलद्वीपोत्पन्ननीलोपलप्रभस्येति यावत् । तथा भगवान् अगस्त्यः- सिंहलस्थाकरोद्भूता महानीलास्तु ते स्मृताः' इति ।
कंसकृषः = कंसारेः श्रीकृष्णस्य । पुरः = अग्रे । उच्चकैः = उन्नते । विष्टरे = आसने । निषेदिवान् = उपविष्टवान्, निषण्णः । सः = नारदः । अभिसायं = सायङ्कालाभिमुखम्, सायङ्काले । श्रितोदयाद्रेः = प्राप्तोदयाचलस्य । चन्द्रमसः = चन्द्रस्य । अभिरामतां = शोभाम्, रमणीयताम् । अचूचुरत् = चोरितवान्, प्राप्तवान्, अनुचकारेति वा । 'महामहानीलशिलारुचः' इत्यत्रोपमालङ्कारः । 'अचूचुरत् चन्द्रमसोऽभिरामताम्' इत्यत्र चान्यस्यान्यधर्मसम्बन्धासम्भवाच्चन्द्रमसोऽभिरामतामिवाभिरामता-मित्यौपम्यपर्यवसानादसम्भवद्वस्तु सम्बन्धरूपो निदर्शनालङ्कारः । उपमा चात्र प्रधानमित्यनयोरङ्गाङ्गिभावेन सङ्करः ।

Ruru Devi
27/04/21

रुपा उमाकान्त सं० महावि० सुरसेना, पूर्णिया ।

लघुशास्त्री - I खण्ड , साहित्य

श्रुतबोधः

प्र० (1) गणानां मन्त्राः लिखत ।

उत्तरम् - (1) मगण - ॐ मँ मगणाय नमः

(2) यगण - ॐ यँ यगणाय नमः

(3) रगण - ॐ रँ रगणाय नमः

(4) सगण - ॐ सँ सगणाय नमः

(5) तगण - ॐ तँ तगणाय नमः

(6) जगण - ॐ जँ जगणाय नमः

(7) भगण - ॐ भँ भगणाय नमः

(8) नगण - ॐ नँ नगणाय नमः

Renu Dev
27/04/2

राधा उमाकान्त सं० महावि० सुख